International Journal of Sanskrit Research 2017; 3(1): 165-166

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(1): 165-166
© 2017 IJSR
www.anantaajournal.com
Received: 22-11-2016
Accepted: 26-12-2016

डा. हेमन्त कुमार मुदुलि
व्याकरणाध्यापकः, विजयचान्द संस्कृत महाविद्यालयः, समागोल, कुजङ्ग, जगतसिंहपुर, ओडिशा, भारत

Correspondence
डा. हेमन्त कुमार मुदुलि
व्याकरणाध्यापकः, विजयचान्द संस्कृत महाविद्यालयः, समागोल, कुजङ्ग, जगतसिंहपुर, ओडिशा, भारत

# शक्तितत्त्व विमर्शः

डा. हेमन्त कुमार मुदुलि

## प्रस्तावना

“प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि”[1] इतिन्यायसूत्रानुसारम् चत्वारि प्रमाणानि सन्ति। तद्यथा-(१)प्रत्यक्षम् (२)अनुमानम् (३)उपमानम् (४)शब्दश्च। तत्र शब्दश्च आप्तोपदेशरूपः प्रमाणम् उपदिश्यते। असौ उपदेशः[2] आप्तस्य उपदेशःआप्तोपदेशः। आप्तोचारितः इत्यर्थः। यद्वा उपदेशनम् उपदेशः उपपूर्वकात् दिश् धतोः भावे घञं-प्रत्यये उपदेश इति रूपम् निष्पद्यते। तथा च आप्तोपदेशेनआप्तोचारणेन रूप्यते ज्ञायते इति आप्तोपदेशरूपः।तथा च आप्तकर्त्तृकः व्यवहारः ग्राह्यः इत्यर्थः। यद्वा आप्तश्चासौ उपदेशश्च आप्तोपदेशः युक्तोपदेशः इत्यर्थः। उपदेशो युक्तत्वम् च यथार्थजनकत्वम्। अतएव आप्तो नाम अनुभवेन वस्तुतत्त्वस्य कात्स्न्र्येन निश्चयवान् रागादिवशादपि नान्यथावादी[3] यः स एव आप्तो भवति इति पतञ्जलिना चरकग्रन्थे प्रतिपादितम्। अर्थात् यः असौ स्वस्य अनुभवेन वास्तविकम् ज्ञानम् पूर्णतया निश्चयितुम् शक्नोति। सांसारिक-रागद्वेषादि-वशादपि यः यथार्थवादी असत्यवादी वा न भवति। असौ एव आप्तो[4] भवति। एवं च रागादिरहितत्वे सति सकलवस्तुविषयक स्वीयानुभवः प्रयोज्य निश्चयवत्वम् आत्मवत्वम् इत्यर्थः फलति।

अत्र नैयायिकदिशा प्रमाण पदार्थ विचार्य्यते। प्रमाकरणत्वम्[5] प्रमाणत्वम् इति प्रमाण लक्षणम्। तत्र शब्दस्य प्रमाजनकत्वम्। सर्वैः शब्दैः सर्वेषां शोतृणाम् वोधयति भयेन शाब्दबोधकस्मात् शब्दात् कः अर्थः वोधयितुम् शक्यः इति एवं रुपं कार्य्यकारण[6] भावः अङ्गीक्रियते। अतएव यस्मात् शब्दात्

[1]न्या.द.
[2]सि.कौ.
[3].प.ल.म.
[4].च.सं.
[5]त.भा.
[6]वा.प.

योऽर्थः प्रतिपादयितुम् शक्यः तस्मात् शब्दात् सैव अर्थः प्रतिपादयितुम् शक्यः। अतः तदविषयकः शाब्दवुद्धित्त्वावचिन्नं[7] प्रति वृति प्रयोज्योपस्थिते अन्वय वेतिरेकाभ्याम् कारणत्वम् अङ्गीकरणीयम्। एवं च तद्धर्मावच्छिन्ननिरुपित[8] वृत्तिविशिष्टज्ञानम् हेतु कार्यकारण भावः सिद्धयति। यथा घटादीनाम् अवच्छेदकाः घटत्वादयः अतः घटादयःते घटत्वादिभिः अवच्छिन्नाः भवन्ति। एवं च घटधर्मावच्छिन्न घटविषयक शाब्दवुद्धित्वावच्छिन्नं प्रति घटत्वधर्मावच्छिन्न[9] घटनिरूपिका या वृत्ति तद् विशिष्टज्ञानम् हेतुः इति फलति। अतएव घटपदात् पटविषयकः वोधो न भवति। अतएव सादृश्यकार्य्यकारण भावस्वीकारे गुडपदम् गुडत्वावच्छिन्ने शक्यम् इति हेतोः शक्तिज्ञाने गुडत्वस्य एव प्रकारतया भावात् गुडपदस्य गुडत्वावच्छिन्ने एव शक्तिः न तु मधुरत्वावच्छिन्ने। अतः न गुडपदेन मधुरत्वस्य प्रकाशतया प्रतीतिः इति वोध्यते। उक्तं च एतत् समर्थसूत्रभाष्ये न हि गुड इति उक्ते मधुरत्वम् प्रकाशतयागम्यते। अतएव गुडादिशब्देन गुडत्वजाति अवच्छिन्नगुडपदवाच्य इति वोधः जाति प्रकारकः भवति।तत्र अनुमानेन मधुरत्व प्रतीतिः भवितुम् अर्हति।न तु मधुरत्व प्रकारकःवोधः। अतएव अनयारीत्या संस्कारकल्पिका च वृत्ति-स्मृतिः एव शाब्दवृद्धिः शाब्दवोध वा भवति। अत्र वौद्धार्थमादाय वन्ध्यासूतादिनां अर्थवत्वं प्रातिपदिकत्वं वाचार्य्यते।वन्ध्यायाः सुतोत्पत्तेः अभावात् तस्या जातिक्रियायां अन्वयस्य वोधः जायते। आकाशे पुष्पाणाम् सर्वथा असम्भवेन तद् भूषणानाम् धारणमपि असम्भवः भवति। एवं च कूर्म पत्नीनाम् दुग्धस्य असम्भवात् तत् समुदाये स्नानमपि असंभवं भवति। एवमेवशशशृङगाणाम् अभावेन तत् धनुर्धारणम् अपि असंभवम्। एवं च बन्ध्यासूतखपुष्पकृतशेखरकुर्मक्षीर-शशशृङ्गधनुः इत्यादि शब्दानाम् कस्यापि अर्थस्य अभावेन अर्थवत्वाभावात् प्रातिपदिकत्वानापत्तिः वोध्यते इति हेतोः

एषो बन्ध्यासूतोजाति खपुष्पकृतशेखरः
कुर्मक्षीरचयो स्नातः शशशृङ्गधनुर्धरः।।[10]

इति श्लोक प्रयोगः कथं संगच्छेतः इति शंकायाम् अत्र इत्थम् समाधानम् प्रस्तूयते।यद्यपि वन्ध्यासूतखपुष्पकूर्मक्षीर शशशृङ्गादि शब्दानाम् बर्हिजर्गति सर्वथा अभावः परिलक्ष्यते। तथापिवृद्धिदेशपरिकल्पित वन्ध्यासूतादि शब्दवाच्यार्थम् आदाय एव एतेषां वंन्ध्यासूतादि शब्दानां वौद्धार्थम् अङ्गीकृत्य अर्थवत्वसिद्धौ प्रातिपदिकत्वेन स्वादिविभक्तिकार्य्ये पदरूपेण प्रयोगस्य साधुता संगच्छते। अतएव वन्धासूतादि शब्दानाम् वौद्धार्थस्य अर्थवत्वात् प्रातिपदिकत्वात्[11] स्वादिविभाक्तिकार्य्यें पदरूपेण प्रयोगस्य साधुता अवगन्तव्या।

**सहायक ग्रन्थसूची**


1. न्यायदर्शनम्- गौतममुनि, वात्सायन भाष्य-चौखम्बा ,संस्कृत सीरीज, वाराणसी 1942
2. सिद्धान्त कौमुदी- भटोजी दीक्षित, टीकाकारः-गोपालदत्त पाण्ड्रेय, विद्याभवन,प्राच्यविद्या ग्रन्थमाला-1989
3. परमलघुमञ्जुषा- नागेशभट्ट, संपा-जयशङ्करलाल त्रिपाठी,कृष्णदासअकादमी,वाराणसी 1975
4. तर्कभाषा-केशव मिश्र
5. वाक्यपदीय- भर्तृहरिः, डा.शिवशङ्कर अवस्थी, चौखम्बा विद्याभवन, वाराणसी-1997
6. व्युत्पतिवाद- दीपिका टीका
7. चरकसंहिता-आर के *शर्मा,* चौखम्बा संस्कृत ष्टडिज, वाराणसी।


[7]प.ल.म.
[8]प.ल.म.
[9]व्यु.वा.
[10]प.ल.म.
[11]सि.कौ.